# 15. सुदुर्लभा सर्वमनोरमा वाणी

[At the beginning of the 20th century because of the influence of Western languages, the essay as a literary form made an entry into the regional languages of India and became widespread. During this period, scholars of Sanskrit wrote many essays on both traditional as well as modern topics. With the passage of time, these essays found a place in Sanskrit language academics also.

Among the Sanskrit essayists, Pandit Charudatta Shastri is a well-known name. He has written beautiful collection of essays in Sanskrit called 'प्रस्तावतरङ्गिणी'. Here is presented an edited version of his essay titled 'सुदुर्लभा सर्वमनोरमा वाणी'.

The main idea presented in this essay is that there are various kinds of people in this world. The taste and interest of everyone is not the same. As a result, it is difficult to have a speech which can win over everybody. Hence, it is not necessary that every poem or writing will be liked by everybody. With speech also it is the same. Hence we should speak in such a way that everybody likes to listen to it and also see that it does not hurt anyone. Of course, such people are indeed rare.]

---

लोके यद्वस्तु एकस्मै रोचते, तदन्यस्मै न रोचते इत्यतः विचित्ररुचिरयं संसारः । एकस्मिन् परिवारे जातानां समानाचारविचाराणां जनानामपि भिन्ना भिन्ना रुचिर्भवति, किं पुनः विभिन्नेषु परिवारेषु उत्पन्नानां जनानां वार्ता ? समानपितृकेषु पुत्रेषु कश्चित् मधुरं रोचयते, कश्चित् लवणं कश्चित् चाम्लं रसमिति । एवं हि कश्चित् काव्यं रसयति, कश्चित् नाट्यं, कश्चित् शिल्पं, कश्चित् च गणितम् । एवमेव कस्मैचित् शृंगारः प्रियो भवति, कस्मैचित् वीरः, कस्मैचित् करुणः, कस्मैचित् च हास्यरसः । विरलाय कस्मैचित् जनाय बीभत्सरसोऽपि रोचते इति नानात्वं रुचीनां व्यवस्थितं भवति ।

एवं सति, एका एव वाणी सर्वस्य मानसं संतोषयितुं नार्हति । यः खलु आर्षेण संस्कारेण संस्कृतो भवति, तस्मै मृद्वी ऋज्वी च वाणी रोचते, न तु कर्कशा कुटिला वा । अतः एतैः सह वार्तावसरे एतादृशी वाणी एव उचिता भवति । परंतु यः जडः दुर्व्यसनरतः अलसः च सेवकः भवति, तस्मै तस्याधिपः प्रायः कर्कशां वाणीं वदति, कार्ये च संयोजयति, स्वकीयं प्रयोजनं च संपादयति ।

यः खलु ईर्ष्याग्रस्तो भवति तस्मै परस्य दुर्गुणानुवादः रोचते स्वस्य च गुणानुवादः । यः खलु सज्जनो भवति तस्मै परापवादः कथमपि न रोचते । केचन असूयकाः भवन्ति ते हितमपि अनुशासनम् न सहन्ते । तथैव सर्वाङ्गं सुन्दरं सरसं सुभाषितमपि न संतोषयति अल्पज्ञान् ।

यदि सर्वस्य मनोरमा वाणी न शक्यते वक्तुम्, तदा सभामध्ये संगत्य, समितौ समुपस्थाय किं तूष्णीं स्थेयम् किं वा मिथ्या आख्येयम् इति प्रश्नः । अत्रोत्तरं ददाति महाराजः मनुः –

**सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।**
**अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी ।।** इति ॥

एवं व्यवहारेऽपि प्रवृत्ता वाणी सर्वान् समानरूपेण न संतोषयति । वस्तुतः सुदुर्लभा सर्वमनोरमा वाणी । सर्वेऽपि जनाः विचक्षणाः न भवन्ति । केचित् मन्दाः इति वा, केचित् अज्ञाः इति वा स्नेहपूर्णां

वाणीमपि भावयितुं न पारयन्ति । एतादृशान् जनान् दृष्ट्वा किं व्यवहारे वाणीप्रयोगः परित्यक्तव्यः ? न हि न हि । मृगाः सन्तीति यवाः नोप्यन्ते ? उप्यन्ते एव । भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रियन्ते ? अधिश्रियन्ते एव । अतः स्वकीयेन सुरुचिपूर्णेन व्यवहारेण जनान् आनन्दयितुं संस्कृता वाणी एव सततं प्रयोक्तव्या ।

## Glossary

**Noun : (masc.) : शृंगारः** Shringar (erotic), one of the nine Rasas of poetry (Similarly **वीरः** Veera **करुणः** Karuna **हास्यः** Hasya **बीभत्सः** Bibhatsa are also rasas of poetry) **सेवकः** servant, worker **अधिपः** master, lord **परापवादः** speaking ill of others **असूयकः** one who is envious (jealous), finding faults even in virtues **अल्पज्ञः** on who knows little **विचक्षणः** genius **मन्दः** mentally challenged **अज्ञः** ignorant **यवः** barley

**(Fem.) : समितिः** assembly **स्थाली** vessel for cooking, a pot **संस्कृता** cultured

**(Neu.) : शिल्पम्** artistic skill **प्रयोजनम्** purpose, aim **अनुशासनम्** advice, preaching **सुभाषितम्** saying (epigram)

**Pronoun : एकस्मै** for one **अन्यस्मै** for another **कश्चित्** someone **कस्मैचित्** for a few one **एतैः** by all these (masc. and neu.) **तस्मै** for him **परस्य** of other **स्वस्य** one's own **केचन** some **सर्वस्य** of all **केचित्** some

**Adjective : विचित्ररुचिः** having unusual taste / different likings **समानपितृकः** they who have the same father **भिन्ना** different **एका** one **आर्षः** related to seers **जडः** a fool **दुर्व्यसनरतः** absorbed (busy) in bad habits (vices) **अलसः** lazy **मृदु** delicate, soft **ऋज्वी** simple, straight forward **कर्कशा** harsh, cruel **कुटिला** cunning, croocked **मनोरमा** beautiful, attractive **समञ्जसम्** proper, appropriate **सुदुर्लभा** difficult to get, rare (All these adjectives are used here in feminine.)

**Compound :** वार्तावसरे (वार्तायाः अवसरः वार्तावसरः, तस्मिन् । षष्ठी तत्पुरुष) । दुर्व्यसनरतः (दुर्व्यसनेषु रतः दुर्व्यसनरतः । सप्तमी तत्पुरुष) । ईर्ष्याग्रस्तः (ईर्ष्यया ग्रस्तः ईर्ष्याग्रस्तः । तृतीया तत्पुरुष) । दुर्गुणानुवादः (दुर्गुणानाम् अनुवादः दुर्गुणानुवादः । षष्ठी तत्पुरुष) । सभामध्ये (सभायाः मध्यः सभामध्यः, तस्मिन् । षष्ठी तत्पुरुष) । सर्वमनोरमा (सर्वेभ्यः मनोरमा सर्वमनोरमा । चतुर्थी तत्पुरुष) । स्नेहपूर्णाम् (स्नेहेन पूर्णा स्नेहपूर्णा, ताम् । तृतीया तत्पुरुष) । वाणीप्रयोगः (वाण्याः प्रयोगः वाणीप्रयोगः । षष्ठी तत्पुरुष) ।

**Participle :** संतोषयितुम् (सम् + तुष् – तोषि (प्रेरक क्रिया) + तुम्) वक्तुम् (वच् + तुम्) संगत्य (सम् + गम् + त्वा > य) समुपस्थाय (सम् + उप + स्था + त्वा > य) भावयितुम् (भू – भावि (प्रेरक क्रिया) + तुम्) दृष्ट्वा (दृश् + त्वा) आनन्दयितुम् (आ + नन्द् – नन्दि (प्रेरक क्रिया) + तुम्) ।

**Root : First Gana** (Atmanepada) **रुच्** **(रोचते)** to like **सह्** **(सहते)** to bear, tolerate

**Tenth Gana :** (Parasmaipada) **रस्** **(रसयति)** to take interest, to taste **सम् + युज्** **(संयोजयति)** to join (perfectly)

## Notes

**(1) Meaning :** **लोके** in the world **समानाचारविचाराणाम्** of persons having similar actions and thoughts **रोचते** makes one like **नानात्वम्** variety **व्यवस्थितम्** is decided, is established **एवं सति** when it is like this **तस्याधिपः** his master **संपादयति** achieves, gets **हितमपि** to well-wisher also **स्थेयम्** should stand, should be firm **आख्येयम्** should be told **वक्तव्यम्** should be spoken **अब्रुवन्** who does not speak **विब्रुवन्** who speaks against / lies **किल्विषी** sinful **भावयितुम्** to experience, to feel **न पारयन्ति** are not capable **नोप्यन्ते** are they not sown ? **स्थाल्यः** vessels **न अधिश्रियन्ते** are (vessels) not put on stove ? **आनन्दयितुम्** to delight **प्रयोक्तव्या** should be used.

**(2) Sandhi :** यद्वस्तु (यत् वस्तु) । रुचिर्भवति (रुचिः भवति) । बीभत्सरसोऽपि (बीभत्सरसः अपि) । तस्याधिपः (तस्य अधिपः) । सज्जनो भवति (सज्जनः भवति) । वापि (वा अपि) । व्यवहारेऽपि (व्यवहारे अपि) । सन्तीति (सन्ति इति) । नोप्यन्ते (न उप्यन्ते) । स्थाल्यो नाधिश्रियन्ते (स्थाल्यः न अधिश्रियन्ते) ।

## Exercises

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) कस्मैचित् विरलाय जनाय कः रसः रोचते ? ◯

(क) हास्यरसः (ख) करुणरसः (ग) बीभत्सरसः (घ) शृंङ्गाररसः

(2) आर्षेण संस्कारेण संस्कृताय जनाय कीदृशी वाणी रोचते ? ◯

(क) कर्कशा (ख) ऋज्वी (ग) कुटिला (घ) स्पष्टा

(3) परस्य दुर्गुणानुवादः कस्मै रोचते ? ◯

(क) ईर्ष्याग्रस्ताय (ख) दयाग्रस्ताय (ग) मानग्रस्ताय (घ) अपमानग्रस्ताय

(4) स्नेहपूर्णामपि वाणीं के भावयितुं न पारयन्ति ? ◯

(क) मन्दाः (ख) पण्डिताः (ग) साधवः (घ) नीतिज्ञाः

**2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) कर्कशां वाणीं कः कस्मै वदति ?

(2) ईर्ष्याग्रस्ताय स्वस्य किं रोचते ?

(3) के हितमपि अनुशासनं न सहन्ते ?

(4) सभायां कीदृशं वक्तव्यम् ?

(5) जनान् आनन्दयितुं कीदृशी वाणी प्रयोक्तव्या ?

**3. अधोलिखितानि क्रियापदानि ह्यस्तनभूतकालस्य (लङ्लकारस्य) रूपत्वेन परिवर्तयत ।**

(1) रोचते ....................

(2) अर्हति ....................

(3) सहन्ते ....................

(4) पारयन्ति ....................

**4. निम्नलिखितानां पदानां समासप्रकारं लिखत ।**

(1) हास्यरस: ....................

(2) दुर्व्यसनरत: ....................

(3) सुरुचिपूर्ण: ....................

(4) गुणानुवाद: ....................

(5) सर्वमनोरमा ....................

**5. शब्दरूपै: रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | .................... | .................... | स्थाल्य: |
| (2) | मृग: | .................... | .................... |
| (3) | कर्कशाम् | .................... | .................... |
| (4) | परिवारे | .................... | .................... |

**6. वचनानुसारं धातुरूपै: रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | .................... | .................... | रोचन्ते |
| (2) | रसयति | .................... | .................... |
| (3) | .................... | भवत: | .................... |
| (4) | .................... | .................... | पारयन्ति |
| (5) | रोचते | .................... | .................... |

**7. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) That thing which one likes.
(यत् वस्तु एक रुच्)

(2) People have different likings.
(जन भिन्ना भिन्ना रुचि भू)

(3) Even Subhashita cannot please.
(सुभाषित अपि न संतोषय)

(4) Some people are envious.
(केचन जन असूयक भू)

(5) People are not genius.
(जन विचक्षण न भू)

**8. मातृभाषया उत्तराणि लिखत ।**

(1) How can you say that the world is full of people with multiple likings ?

(2) Who likes soft and simple words ?

(3) What does the envious person like ? Whose ?

(4) How should one speak in the assembly ?

(5) Who cannot feel a loving speech ?

**Activity**

- Give reasons for your liking of the dialogue which you have heard.
- Collect Shlokas expressing importance of speech.